णीत् अक्षणिष्ट। क्षणाण क्षणणे। उदित् क्षणित्वा क्षत्वा। क्षतिः क्षतः। क्षणः। नान्तत्वमतेऽपि रूपं तुल्यम् विचि क्षन् इति भेदः।

**क्षण** पु० क्षणोति दुःखं क्षण—अच्। १उत्सवे २मुहूर्त्तात्मक कालस्य द्वादशांशे त्रिंशत्कलारूपे कालांशभेदे अमरः ३प्रशस्तमुहूर्त्ते दीपिका "ध्रुवमृदुचरवर्गे वाजिहस्ता समेतैः क्षणमुदयमथैषां सत्सु केन्द्रस्थितेषु" नाडीद्वयात्मके ४मुहूर्त्तरूपे कालांशे सि० शि० तद्वाक्यं १७८८पृष्ठे दर्शितम्। ५निमेषक्रियावच्छिन्नकालस्य चतुर्थभागे शब्दचि० तादृशार्थाभिप्रायेण "क्षणादिः स्यादुपाधितः" भाषा० व्या० मुक्तावलीवाक्यं तच्च कालशब्दे १९८५पृ० दर्शितम्। ६निर्व्यापारस्थितौ अमरः ७अवसरे ८मध्ये ९पराधीनतायां हेमच०। तत्र उत्सवकालभेदयोः "क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना" माघः। उत्सवे "गार्हस्थ्यमुचितं त्वेकं शूद्रस्य क्षणमाचरेत्" उ०त०ब्रह्मपु०। "क्षणमुत्सवम्" उ०त०रघु०। कालांशे "क्व नु मां क्षणभिन्नसौहृदः" "स्थिताः क्षणं पक्ष्मसु ताडिताधराः" कुमा०। अवसरे "स्थानं नास्ति क्षणो नास्ति नास्ति प्रार्थयिता नरः। तेन नारद! नारीणां सतीत्वमुपजायते" "दीयते स्म शयितुं शयनीये न क्षणः क्षणदयाऽपि वधूभ्यः" माघः। अत्र क्षणदयापि न क्षणो दत्त इति उत्सवार्थत्वेन विरोधस्य कालविशेषार्थत्वेन परिहारात् विरोधाभासः। "नीता रात्रिः क्षण इव मया सार्द्धमिच्छारतैर्या" मेघ०

**क्षणक्षण** अव्य० वी० प्रकारे—द्वित्वम्। क्षणमात्रे त्रिका०

**क्षणतु** पु० क्षण—भावे बा० अतु। क्षते विदरणादौ हेम०

**क्षणद** पु० क्षणं यात्रादिमुहूर्त्तं उत्सवं वा ददाति दा-क। १मौहूर्त्तिके गणके मेदि० २जले न० हेम०। ३रात्रौ ४हरिद्रायाञ्च स्त्री अमरः "क्षणदापायशशाङ्कदर्शनः" रघुः "न क्षणः क्षणदयापि वधूभ्यः" माघः

**क्षणदाकर** पु० क्षणदां करोति हेतौ ट। निशाचरे चन्द्रे "आरुह्य नार्य्यः क्षणदासु यत्र" माघः

**क्षणदाचर** पुंस्त्री क्षणदायां चरति चर-ट। निशाचरे राक्षसे "शान्तिता धर्म्मराजेन प्रसेदुः क्षणदाचराः" भा० व० ५५अ०। "सानुप्लवः प्रभुरपि क्षणदाचराणाम्" रघुः। स्त्रियां जातित्वात् ङीष्। २निशाचरे खगादौ त्रि० स्त्रियां ङीप्।

**क्षणदान्ध्य** न० क्षणदायामान्ध्यम्। रात्रिकाणत्वे। "मोतोजं सैन्धवं कृष्णां रेणुकाञ्चापि पेषयेत्। अजमूत्रेण ता वर्त्यः क्षणदान्ध्याञ्जने हिताः" सुश्रुतः

**क्षणद्युति** स्त्री क्षणं द्युतिरस्याः। क्षणप्रभायां विद्युति।

**क्षणन** न० क्षण—भावे ल्युट्। बधे हनने अमरः

**क्षणनिःश्वास** पुंस्त्री० क्षणात् मुहूर्त्तात् निःश्वासोऽस्य। शिशुमारे (शोशक) शब्दरत्ना०। स्त्रियां जातित्वात् ङीष्।

**क्षणप्रभा** स्त्री क्षणं प्रभाऽस्याः। विद्युति चञ्चलायाम् अमरः

**क्षणभङ्ग** पु० क्षणात्परः भङ्गः ५त०। सर्व्वेषां भावानां क्षणिकत्वे क्षणनश्वरत्वे। स च सर्व्व०द०दर्शितो यथा।

"तत्र क्षणिकत्वं नीलादिक्षणानां सत्त्वेनानुमातव्यं यत् सत् तत् क्षणिकं यथा जलधरपटलं सन्तश्चामी भावा इति। न चायमसिद्धो हेतुः अर्थक्रियाकारित्वलक्षणस्य सत्त्वस्य नीलादिक्षणानां प्रत्यक्षसिद्धत्वात् व्यापकव्यावृत्त्या व्याप्यव्यावृत्तिन्यायेन व्यापकक्रमाक्रमव्यावृत्तावक्षणिकात् सत्त्वव्यावृत्तेः सिद्धत्वाच्च। तच्चार्थक्रियाकारित्वं क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्ति "परस्परविरोधे हि न प्रकारान्तरस्थितिः। नैकतापि विरुद्धानामुक्तिमात्रविरोधतः" इति न्यायेन व्याघातस्योद्भटत्वात्। तौ च क्रमाक्रमौ स्थायिनः सकाशाद्व्यावर्त्तमानौ अर्थक्रियामपि व्यावर्त्तयन्तौ क्षणिकत्वपक्ष एव सत्त्वं व्यवस्थापयत इति सिद्धम्। नन्वक्षणिकस्यार्थक्रियाकारित्वं किं न स्यात्? इति चेत् तदयुक्तं विकल्पासहत्वात् तथा हि वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोः किमर्थक्रिययोः स्थायिनः सामर्थ्यमस्ति? न वा?। आद्ये तयोरनिराकरणप्रसङ्गः समर्थस्य क्षेपायोगात् यत् यदा यत्करणसमर्थं तत् तदा तत्करोत्येव यथा सामग्री स्वकार्य्यं समर्थश्चायं भाव इति प्रसङ्गानुमानाच्च। द्वितीयेऽपि कदापि न कुर्य्यात् सामर्थ्यमात्रानुबन्धित्वादर्थक्रियाकारित्वस्य, यत् यदा यन्न करोति तत् तदा तत्रासमर्थं यथा शिलाशकलमङ्कुरे, न चैवं वर्त्तमानार्थक्रियाकरणकाले वृत्तवर्त्तिष्यमाणे अर्थक्रिये करोतीति तद्विपर्य्ययाच्च। ननु क्रमवत्सहकारिलाभात् स्थायिनः अतीतानागतयोः क्रमेण करणमुपपद्यते इति चेत् तत्रेदं भवान् पृष्टो व्याचष्टां, सहकारिणः किं भावस्योपकुर्वन्ति? न वा?। नो चेत् नापेक्षणीयास्ते अकिञ्चित्कुर्व्वतां तेषां तादर्थ्यायोगात्। उपकारकत्वपक्षे सोऽयमुपकारः किं भावाद्भिद्यते? न वा?। भेदपक्षे आगन्तुकस्यैव तस्य कारणत्वं स्यात् न भावस्याक्षणिकस्य,